# Shivaproktani Ashtakavachani

# શિવપ્રોક્તાનિ અષ્ટકવચાનિ

## Document Information

Text title : Shivaproktani Ashtakavachani Eight Kavachas

File name : aShTakavachAnishivaproktAni.itx

Category : devii, aShTaka, kavacha, dashamahAvidyA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 56

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# શિવપ્રોક્તાનિ અષ્ટકવચાનિ

શ્રીભગવાનુવાચ
અસ્ય મન્ત્રસ્ય કવચં શૃણુ વેતાલભૈરવ ।
વૈષ્ણવીતન્ત્રસંજ્ઞસ્ય વૈષ્ણવ્યાશ્ચ વિશેષતઃ ॥ ૧॥

તત્ર મન્ત્રાદ્યક્ષરં તુ વાસુદેવસ્વરૂપધૃક્ ।
વર્ણો દ્વિતીયો બ્રહ્મૈવ તૃતીયશ્ચન્દ્રશેખરઃ ॥ ૨॥

ચતુર્થો ગજવક્ત્રશ્ચ પઞ્ચમસ્તુ દિવાકરઃ ।
શક્તિઃ સ્વયં પકારશ્ચ મહામાયા જગન્મયી ॥ ૩॥

યકારસ્તુ મહાલક્ષ્મીઃ શેષવર્ણઃ સરસ્વતી ।
યોગિનીપૂર્વવર્ણસ્ય શૈલપુત્રી પ્રકીર્તિતા ॥ ૪॥

દ્વિતીયસ્ય તુ વર્ણસ્ય ચણ્ડિકા યોગિની મતા ।
ચન્દ્રઘણ્ટા તૃતીયસ્ય કુષ્માણ્ડી તત્ પરસ્ય ચ ॥ ૫॥

સ્કન્દમાતા તકારસ્ય યસ્ય કાત્યાયની સ્વયમ્ ।
કાલરાત્રિઃ સપ્તમસ્ય મહાદેવીતિ સંસ્થિતા ॥ ૬॥

પ્રથમં વર્ણકવચં યોગિનીકવચં તથા ।
દેવૌઘકવચં પશ્ચાદ્દેવીદિક્કવચં તથા ॥ ૭॥

તતસ્તુ પાર્શ્વકવચં દ્વિતીયાન્તાવ્યયસ્ય ચ ।
કવચં તુ તતઃ પશ્ચાત્ ષડ્વર્ણં કવચં તથા ॥ ૮॥

અભેદ્યકવચં ચેતિ સર્વત્રાણપરાયણમ્ ।
ઇમાનિ કવચાન્યષ્ટૌ યો જાનાતિ નરોત્તમઃ ॥ ૯॥

સોઽહમેવ મહાદેવી દેવીરૂપશ્ચ શક્તિમાન્ ।
વર્ણકવચં અથવા વૈષ્ણવીતન્ત્રકવચં
અસ્ય શ્રીવૈષ્ણવીતન્ત્રકવચસ્ય નારદ-ઋષિઃ અનુષ્ટુપ્છન્દઃ ॥ ૧૦॥

કાત્યાયની દેવતા । સર્વકામાર્થસાધને વિનિયોગઃ ।
અઃ પાતુ પૂર્વકાષ્ઠાયામાગ્નેય્યાં પાતુ કઃ સદા ॥ ૧૧॥

પાતુ ચો યમકાષ્ઠાયાં ટો નૈરૃત્યાં ચ સર્વદા ।
માં પાતુ તોઽસૌ પાશ્ચાત્યે શક્તિર્વાયવ્યદિગ્ગતા ॥ ૧૨॥

યઃ પાતુ માં ચોત્તરસ્યામૈશાન્યાં સસ્તથાવતુ ।
મૂર્ધ્નિ રક્ષતુ માં સોઽસૌ બાહૌ માં દક્ષિણે તુ કઃ ॥ ૧૩॥

માં વામબાહૌ ચઃ પાતુ હૃદિ ટો માં સદાવતુ ।
તઃ પાતુ કણ્ઠદેશે માં કટ્યોઃ શક્તિસ્તથાવતુ ॥ ૧૪॥

યઃ પાતુ દક્ષિણે પાદે ષો માં વામપાદે તથા ।
યોગિનીકવચં
શૈલપુત્રી તુ પૂર્વસ્યામાગ્નેય્યાં પાતુ ચણ્ડિકા ॥ ૧૫॥

ચન્દ્રઘણ્ટા પાતુ યામ્યાં યમભીતિવિવર્ધિની ।
નૈરૃત્યે ત્વથ કૂષ્માણ્ડી પાતુ માં જગતાં પ્રસૂઃ ॥ ૧૬॥

સ્કન્દમાતા પશ્ચિમાયાં માં રક્ષતુ સદૈવ હિ ।
કાત્યાયની માં વાયવ્યે પાતુ લોકેશ્વરી સદા ॥ ૧૭॥

કાલરાત્રી તુ કૌબેર્યાં સદા રક્ષતુ માં સ્વયમ્ ।
મહાગૌરી તથૈશાન્યાં સતતં પાતુ પાવની ॥ ૧૮॥

દેવૌઘ કવચં
નેત્રયોર્વાસુદેવો માં પાતુ નિત્યં સનાતનઃ ।
બ્રહ્મા માં પાતુ વદને પદ્મયોનિરયોનિજઃ ॥ ૧૯॥

નાસાભાગે રક્ષતુ માં સર્વદા ચન્દ્રશેખરઃ ।
ગજવક્ત્રઃ સ્તનયુગ્મે પાતુ નિત્યં હરાત્મજઃ ॥ ૨૦॥

વામદક્ષિણપાણ્યોર્માં નિત્યં પાતુ દિવાકરઃ ।
મહામાયા સ્વયં નાભૌ માં પાતુ પરમેશ્વરી ॥ ૨૧॥

મહાલક્ષ્મીઃ પાતુ ગુહ્યે જાનુનોશ્ચ સરસ્વતી ।
દેવીદિક્કવચં
મહામાયા પૂર્વભાગે નિત્યં રક્ષતુ માં શુભા ॥ ૨૨॥

અગ્નિજ્વાલા તથાગ્નેય્યાં પાયાન્નિત્યં વરાસિની ।

રુદ્રાણી પાતુ માં યામ્યાં નૈરૃત્યાં ચણ્ડનાયિકા ॥ ૨૩॥

ઉગ્રચણ્ડા પશ્ચિમાયાં પાતુ નિત્યં મહેશ્વરી ।
પ્રચણ્ડા પાતુ વાયવ્યે કૌબેર્યાં ઘોરરૂપિણી ॥ ૨૪॥

ઈશ્વરી ચ તથૈશાન્યાં પાતુ નિત્યં સનાતની ।
ઊર્ધ્વં પાતુ મહામાયા પાત્વધઃ પરમેશ્વરી ॥ ૨૫॥

પાર્શ્વકવચં
અગ્રતઃ પાતુ મામુગ્રા પૃષ્ઠતો વૈષ્ણવી તથા ।
બ્રહ્માણી દક્ષિણે પાર્શ્વે નિત્યં રક્ષતુ શોભના ॥ ૨૬॥

માહેશ્વરી વામપાર્શ્વે નિત્યં પાયાદ્વૃષધ્વજા ।
અવ્યયકવચં
કૌમારી પર્વતે પાતુ વારાહી સલિલે ચ મામ્ ॥ ૨૭॥

નારસિંહી દંષ્ટ્રિભયે પાતુ માં વિપિનેષુ ચ ।
ઐન્દ્રી માં પાતુ ચાકાશે તથા સર્વજલે સ્થલે ॥ ૨૮॥

સેતુઃ સર્વાઙ્ગુલીઃ પાતુ દેવાદિઃ પાતુ કર્ણયોઃ ।
દેવાન્તશ્ચિબુકે પાતુ પાર્શ્વયોઃ શક્તિપઞ્ચમઃ ॥ ૨૯॥

ષડ્વર્ણકવચં
હા પાતુ માં તથૈવોર્વોર્માયા રક્ષતુ જઙ્ઘયોઃ ।
સર્વેન્દ્રિયાણિ યઃ પાતુ રોમકૂપેષુ સર્વદા ॥ ૩૦॥

ત્વચિ માં વૈ સદા પાતુ માં શમ્ભુઃ પાતુ સર્વદા ।
નખદન્તકરોષ્ઠાદૌ રાં માં પાતુ સદૈવ હિ ॥ ૩૧॥

દેવાદિઃ પાતુ માં વસ્તૌ દેવાન્તઃ સ્તનકક્ષયોઃ ।
એતદાદૌ તુ યઃ સેતુર્બાહ્યે માં પાતુ દેહતઃ ॥ ૩૨॥

અભેદ્યકવચં
આજ્ઞાચક્રે સુષુમ્નાયાં ષટ્ચક્રે હૃદિ સન્ધિષુ ।
આદિષોડશચક્રે ચ લલાટાકાશ એવ ચ ॥ ૩૩॥

વૈષ્ણવીતન્ત્રમન્ત્રો માં નિત્યં રક્ષંશ્ચ તિષ્ઠતુ ।
અર્ણનાડીષુ સર્વાસુ પાર્શ્વકક્ષશિખાસુ ચ ॥ ૩૪॥ ૩૪ ॥

રુધિરસ્નાયુમજ્જાસુ મસ્તિષ્કેષુ ચ પર્વસુ ।

દ્વિતીયાષ્ટાક્ષરો મન્ત્રઃ કવચં પાતુ સર્વતઃ ॥ ૩૫॥

રેતો વાયૌ નાભિરન્ધ્રે પૃષ્ઠસન્ધિષુ સર્વતઃ ।
ષડક્ષરસ્તૃતીયોઽયં મન્ત્રો માં પાતુ સર્વદા ॥ ૩૬॥

નાસારન્ધ્રે મહામાયા કણ્ઠરન્ધ્રે તુ વૈષ્ણવી ।
સર્વસન્ધિષુ માં પાતુ દુર્ગા દુર્ગાર્તિહારિણી ॥ ૩૭॥

શ્રોત્રયોર્હું ફડિત્યેવં નિત્યં રક્ષતુ કાલિકા ।
નેત્રબીજત્રયં નેત્રે સદા તિષ્ઠતુ રક્ષિતુમ્ ॥ ૩૮॥

ૐ ઐં હ્રીં હ્રૌં નાસિકાયાં રક્ષન્તી ચાસ્તુ ચણ્ડિકા ।
ૐ હ્રીં હૂં માં સદા તારા જિહ્વામૂલે તુ તિષ્ઠતુ ॥ ૩૯॥

હૃદિ તિષ્ઠતુ મે સેતુર્જ્ઞાનં રક્ષિતુમુત્તમમ્ ।
ૐ ક્ષૌં ફટ્ ચ મહામાયા પાતુ માં સર્વતઃ સદા ॥ ૪૦॥

ૐ યું સઃ પ્રાણાન્ કૌશિકી માં પ્રાણાન્ રક્ષતુ રક્ષિકા ।
ૐ હ્રીં હૂં સૌં ભર્ગદયિતા દેહશૂન્યેષુ પાતુ મામ્ ॥ ૪૧॥

ૐ નમઃ સદા શૈલપુત્રી સર્વાન્ રોગાન્ પ્રમૃજ્યતામ્ ।
ૐ હ્રીં સઃ સ્ફેં ક્ષઃ ફડસ્ત્રાય સિંહવ્યાઘ્રભયાદ્રણાત્ ॥ ૪૨॥

શિવદૂતી પાતુ નિત્યં હ્રીં સર્વાસ્ત્રેષુ તિષ્ઠતુ ।
ૐ હ્રાં હ્રીં સશ્ચણ્ડઘણ્ટા કર્ણચ્છિદ્રેષુ પાતુ મામ્ ॥ ૪૩॥

ૐ ક્લીં સઃ કામેશ્વરી કામાનભિતિષ્ઠતુ રક્ષતુ ।
ૐ આં હૂં ફડુગ્રચણ્ડા રિપૂન્ વિઘ્નાન્ વિમર્દતામ્ ॥ ૪૪॥

ૐ પં પાતુ નારસિંહી માં ક્રવ્યાદેભ્યસ્તથાસ્ત્રતઃ ।
ૐ શ્રીં હ્રીં હ્રાં હ્રં કાલરાત્રિઃ ખડ્ગાદ્રક્ષતુ માં સદા ॥ ૪૫॥

ૐ અં શૂલાત્ પાતુ નિત્યં વૈષ્ણવી જગદીશ્વરી ।
ૐ કં બ્રહ્માણી પાતુ ચક્રાત્ ૐ ચં રુદ્રાણી તુ શક્તિતઃ ॥ ૪૫ ૪૬॥

ૐ ટં કૌમારી પાતુ વજ્રાત્ ૐ તં વારાહી તુ કાણ્ડતઃ ।
ૐ પં પાતુ નારસિંહી માં ક્રવ્યાદેભ્યસ્તથાસ્ત્રતઃ ॥ ૪૭॥

શસ્ત્રાસ્ત્રેભ્યઃ સમસ્તેભ્યો યન્ત્રેભ્યોઽનિષ્ટમન્ત્રતઃ ।
ચણ્ડિકા માં સદા પાતુ યં સં દેવ્યૈ નમો નમઃ ।
વિશ્વાસઘાતકેભ્યો મામૈન્દ્રી રક્ષતુ મન્મનઃ ॥ ૪૮॥

ૐ નમો મહામાયાયૈ ૐ વૈષ્ણવ્યૈ નમો નમઃ ।
રક્ષ માં સર્વભૂતેભ્યઃ સર્વત્ર પરમેશ્વરિ ॥ ૪૯॥

આધારે વાયુમાર્ગે હૃદિ કમલદલે ચન્દ્રવત્ સ્મેરસૂર્યે
વસ્તૌ વહ્નૌ સમિદ્ધે વિશતુ વરદયા મન્ત્રમષ્ટાક્ષરન્તત્ ।
યદ્બ્રહ્મા મૂર્ધ્નિ ધત્તે હરિરવતિ ગલે ચન્દ્રચૂડો હૃદિસ્થં
તં માં પાતુ પ્રધાનં નિખિલમતિશયં પદ્મગર્ભાભબીજમ્ ॥ ૫૦॥

આદ્યાઃ શેષાઃ સ્વરૌઘૈર્નમયવલવરૈરસ્વરેણાપિ યુક્તૈઃ
સાનુસ્વારાવિસર્ગૈર્હરિહરવિદિતં યત્સહસ્રં ચ સાષ્ટમ્ ।
અન્ત્રાણાં સેતુબન્ધં નિવસતિ સતતં વૈષ્ણવીતન્ત્રમન્ત્રે
તન્માં પાયાત્પવિત્રં પરમપરમજં ભૂતલવ્યોમભાગે ॥ ૫૧॥

અઙ્ગાન્યષ્ટૌ તથાષ્ટૌ વસવ ઇહ તથૈવાષ્ટમૂર્તિર્દલાનિ
પ્રોક્તાન્યષ્ટૌ તથાષ્ટૌ મધુમતિરચિતાઃ સિદ્ધયોઽષ્ટૌ તથૈવ ।
અષ્ટાવષ્ટાષ્ટસઙ્ખ્યા જગતિ રતિકલાઃ ક્ષિપ્રકાષ્ટાઙ્ગયોગા
મય્યષ્ટાવક્ષરાણિ ક્ષરતુ ન હિ ગણો યદ્ભિદો યસ્ત્વમૂષામ્ ॥ ૫૨॥

ફલશ્રુતિઃ
ઇતિ તત્કવચં પ્રોક્તં ધર્મકામાર્થસાધનમ્ ।
ઇદં રહસ્યં પરમમિદં સર્વાર્થસાધકમ્ ॥ ૫૩॥

યઃ સકૃચ્છૃણુયાદેતત્ કવચં મયકોદિતમ્ ।
સ સર્વાંલ્લભતે કામાન્ પરત્ર શિવરૂપતામ્ ॥ ૫૪॥

સકૃદ્યસ્તુ પઠેદેતત્ કવચં મયકોદિતમ્ ।
સ સર્વયજ્ઞસ્ય ફલં લભતે નાત્ર સંશયઃ ॥ ૫૫॥

સઙ્ગ્રામેષુ જયેચ્છત્રું માતઙ્ગાનિવ કેશરી ।
દહેત્તૃણં યથાવહ્નિસ્તથા શત્રું દહેત્સદા ॥ ૫૬॥

નાસ્ત્રાણિ તસ્ય શસ્ત્રાણિ શરીરે પ્રવિશન્તિ વૈ ।
ન તસ્ય જાયતે વ્યાધિર્ન ચ દુઃખં કદાચન ॥ ૫૭॥

ગુટિકાઞ્જનપાતાલપાદલેપરસાઞ્જનમ્ ।
ઉચ્ચાટનાદ્યાસ્તાઃ સર્વાઃ પ્રસીદન્તિ ચ સિદ્ધયઃ ॥ ૫૮॥

વાયોરિવ ગતિસ્તસ્ય ભવેદન્યૈરવારિતા ।

દીર્ઘાયુઃ કામભોગી ચ ધનવાનભિજાયતે ॥ ૫૯॥

અષ્ટમ્યાં સંયતો ભૂત્વા નવમ્યાં વિધિવચ્છિવામ્ ।
પૂજયિત્વા વિધાનેન વિચિન્ત્ય મનમા શિવામ્ ॥ ૬૦॥

યો ન્યસેત્ કવચં દેહે તસ્ય પુણ્યફલં શૃણુ ।
જિતવ્યાધિઃ શતાયુશ્ચ રૂપવાન્ ગુણવાન્ સદા ॥ ૬૧॥

ધનરત્નૌઘસમ્પૂર્ણો વિદ્યાવાન્ સ ચ જાયતે ।
નાગ્નિર્દહતિ તત્કાયં નાપઃ સઙ્ક્લેદયન્તિ ચ ॥ ૬૨॥

ન શોષયતિ તં વાયુરવ્યાત્ તં ન હિનસ્તિ ચ ।
શસ્ત્રાણિ નૈનં છિન્દન્તિ ન તાપયતિ ભાસ્કરઃ ॥ ૬૩॥

ન તસ્ય જાયતે વિઘ્નો નાસ્તિ તસ્ય ચ સઞ્જ્વરઃ ।
વેતાલાશ્ચ પિશાચાશ્ચ રાક્ષસા ગણનાયકાઃ ॥ ૬૪॥

સર્વે તસ્ય વશં યાન્તિ ભૂતગ્રામાશ્ચતુર્વિધાઃ ।
નિત્યં પઠતિ યો ભક્ત્યા કવચં હરિનિર્મિતમ્ ॥ ૬૫॥

સોઽહમેવ મહાદેવો મહામાયા ચ માતૃકા ।
ધર્માર્થકામમોક્ષાશ્ચ તસ્ય નિત્યં કરે સ્થિતાઃ ॥ ૬૬॥

અન્યસ્ય વરદઃ સોઽર્થૈર્નિત્યં ભવતિ પણ્ડિતઃ ।
કવિત્વં સત્યવાદિત્વં સતતં તસ્ય જાયતે ॥ ૬૭॥

વદેચ્છ્લોકસહસ્રાણિ ભવેચ્છ્રુતિધરસ્તથા ।
લિખિતં યસ્ય ગેહે તુ કવચં ભૈરવ સ્થિતમ્ ॥ ૬૮॥

ન તસ્ય દુર્ગતિઃ ક્વાપિ જાયતે તસ્ય દૂષણમ્ ।
ગ્રહાશ્ચ સર્વે તુષ્યન્તિ વશં ગચ્છન્તિ ભૂમિપાઃ ॥ ૬૯॥

યદ્રાજ્યે કવચજ્ઞોઽસ્તિ જાયન્તે તત્ર નેતયઃ ।
સેતુર્દેવઃ શક્તિબીજં પઞ્ચમોહાય તે નમઃ ॥ ૭૦॥

વાયુર્બલેન ચૈતાયૈ દ્વિતીયાષ્ટાક્ષરં ત્વિદમ્ ।
સેતુર્દેવોઽથ વૈષ્ણવ્યૈ ષડક્ષરમિદં સ્મૃતમ્ ॥ ૭૧॥

એતદ્દ્વયં તુ જિહ્વાગ્રે સતતં યસ્ય વર્તતે ।
તસ્ય દેવી મહામાયા કાયે તિષ્ઠતિ વૈ સદા ॥ ૭૨॥

મન્ત્રાણાં પ્રણવઃ સેતુસ્તત્સેતુઃ પ્રણવઃ સ્મૃતઃ ।
ક્ષરત્યનોઙ્કૃતઃ પૂર્વં પરસ્તાચ્ચ વિશીર્યતે ॥ ૭૩॥

નમસ્કારો મહામન્ત્રો દેવ ઇત્યુચ્યતે સુરૈઃ ।
દ્વિજાતીનામયં મન્ત્રઃ શૂદ્રાણાં સર્વકર્મણિ ॥ ૭૪॥

અકાર ચાત્યુકારં ચ મકારં ચ પ્રજાપતિઃ ।
વેદત્રયાત્સમુદ્ધૃત્ય પ્રણવં નિર્મમે પુરા ॥ ૭૫॥

સ ઉદાત્તો દ્વિજાતીનાં રાજ્ઞાં સ્યાદનુદાત્તકઃ ।
પ્રચિતશ્ચોરુજાતાનાં મનસાપિ તથા સ્મરેત્ ॥ ૭૬॥

ચતુર્દશસ્વરો યોઽસૌ શેષ ઔકારસંજ્ઞકઃ ।
સ ચાનુસ્વારચન્દ્રાભ્યાં શૂદ્રાણાં સેતુરુચ્યતે ॥ ૭૭॥

નિઃસેતુ ચ યથા તોયં ક્ષણાન્નિમ્નં પ્રસર્પતિ ।
મન્ત્રસ્તથૈવ નિઃસેતુઃ ક્ષણાત્ ક્ષરતિ યજ્વનામ્ ॥ ૭૮॥

તસ્માત્ સર્વત્ર મન્ત્રેષુ ચતુર્વર્ણા દ્વિજાતયઃ ।
પાર્શ્વયોઃ સેતુમાદાય જતકર્મસમારભેત્ ॥ ૭૯॥

શૂદ્રાણામાદિસેતુર્વા દ્વિઃસેતુર્વા યથેચ્છતઃ ।
દ્વિઃસેતવઃ સમાખ્યાતાઃ સર્વદૈવ દ્વિજાતયઃ ॥ ૮૦॥

ઔર્વ ઉવાચ
એતત્ તે સર્વમાખ્યાતં કવચં ત્ર્યમ્બકોદિતમ્ ।
અભેદ્યં કવચં તત્તુ કવચાષ્ટકમુત્તમમ્ ॥ ૮૧॥

મહામાયામન્ત્રકલ્પં કવચં યન્ત્રસંયુતમ્ ।
ષડક્ષરસમાયુક્તં ત્રિષુ લોકેષુ દુર્લભમ્ ॥ ૮૨॥

એતત્ ત્વં નૃપશાર્દૂલ નિત્યભક્તિયુતઃ પઠન્ ।
જપન્ મન્ત્રં ચ વૈષ્ણવ્યાઃ સર્વસિદ્ધિમવાપ્સ્યસિ ॥ ૮૩॥

ઇતિ કાલિકાપુરાણે ષટ્પઞ્ચાશોઽધ્યાયાન્તર્ગતા
શિવપ્રોક્તા અષ્ટકવચાનિ સમાપ્તા ।

Proofread by PSA Easwaran

*Shivaproktani Ashtakavachani*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*